मध्ये त्विलावृतं नाम महामेरोः समन्ततः। चतुर्विंशत्सहस्राणि विस्तीर्णो योजनैः समः ॥ १९ ॥
मध्ये तस्य महामेरुर्विधूम इव पावकः। वेद्यर्धं दक्षिणं मेरोरुत्तरार्धं तथोत्तरम् ॥ २० ॥
वर्षाणि यानि सप्तात्र तेषां वै वर्षपर्वताः। द्वे द्वे सहस्रे विस्तीर्णा योजनैर्दक्षिणोत्तरम् ॥ २१ ॥
जम्बूद्वीपस्य विस्तारस्तेषामायाम उच्यते। नीलश्च निषधश्चैव तेषां हीनाश्च ये परे ॥ २२ ॥

प्रदेश है, वह हिरण्यक-वर्षके नामसे प्रसिद्ध है। हिरण्यकवर्षके बाद शृङ्गशाक नामक वर्ष है, जिसे कुरुवर्ष भी कहते हैं। मेरुपर्वतके दक्षिण और उत्तर दिशामें धनुषके आकारमें दो वर्ष स्थित हैं। उन्हींके मध्यमें इलावृतवर्ष है। निषध पर्वतके पूर्व दिशामें मेरुकी वेदीका अर्धभाग दक्षिणवेदी और इलावृतसे पश्चिमकी ओर वेदीका आधा भाग उत्तरवेदीके नामसे विख्यात है। इन्हीं दोनोंके बीचमें मेरुकी स्थिति समझनी चाहिये, जहाँ इलावृतवर्ष अवस्थित है। नील पर्वतके दक्षिण और निषध पर्वतके उत्तर माल्यवान् नामक पर्वत है, जिसकी गणना विशाल पर्वतोंमें है। यह उत्तरसे दक्षिणकी ओर लम्बा है। यह पश्चिम दिशामें सागर-पर्यन्त बत्तीस हजार योजनमें फैला हुआ है। इस प्रकार माल्यवान् पर्वत नील और निषध पर्वतोंके बीचमें एक हजार योजनके विस्तारमें स्थित है। इसी तरह गन्ध-मादन पर्वत भी बत्तीस हजार योजन विस्तृत बतलाया गया है। इन दोनोंके मण्डलके मध्यमें मेरु नामक स्वर्णमय पर्वत है। यह चार प्रकारके रंगोंसे युक्त, चौकोर और अत्यन्त ऊँचा है॥ २९—३७॥

नानावर्णः स पार्श्वेषु पूर्वान्ते श्वेत उच्यते।
पीतं तु दक्षिणं तस्य भृङ्गिपत्रनिभं परम्। उत्तरं तस्य रक्तं वै इति वर्णसमन्वितः॥ ३८॥
मेरुस्तु शुशुभे दिव्यो राजवत् स तु वेष्टितः। आदित्यतरुणाभासो विधूम इव पावकः॥ ३९॥
योजनानां सहस्राणि चतुराशीति सूच्छ्रितः। प्रविष्टः षोडशाधस्तादष्टाविंशतिविस्तृतः॥ ४०॥
विस्तराद् द्विगुणश्चास्य परीणाहः समंततः। स पर्वतो महादिव्यो दिव्यौषधिसमन्वितः॥ ४१॥
भुवनैरावृतः सर्वैर्जातरूपपरिष्कृतैः।
तत्र देवगणाश्चैव गन्धर्वासुरराक्षसाः। शैलराजे प्रमोदन्ते सर्वतोऽप्सरसां गणैः॥ ४२॥
स तु मेरुः परिवृतो भुवनैर्भूतभावनैः। यस्येमे चतुरो देशा नानापार्श्वेषु संस्थिताः॥ ४३॥
भद्राश्वं भारतं चैव केतुमालं च पश्चिमे। उत्तराश्चैव कुरवः कृतपुण्यप्रतिश्रयाः॥ ४४॥
विष्कम्भपर्वतास्तद्वन्मन्दरो गन्धमादनः। विपुलश्च सुपार्श्वश्च सर्वरत्नविभूषिताः॥ ४५॥
अरुणोदं मानसं च सितोदं भद्रसंज्ञितम्। तेषामुपरि चत्वारि सरांसि च वनानि च॥ ४६॥
तथा भद्रकदम्बस्तु पर्वते गन्धमादने। जम्बूवृक्षस्तथाश्वत्थो विपुलेऽथ वटः परम्॥ ४७॥

उसके पार्श्वभाग अनेक प्रकारके रंगोंसे विभूषित हैं। इसका पूर्वीय भाग श्वेत, दक्षिणी भाग पीला, पश्चिमका भाग भ्रमरके पंखके समान काला और उत्तरी हिस्सा लाल है। इस प्रकार यह चार रंगोंसे युक्त कहा जाता है। इस तरह चारों ओरसे पर्वतोंसे घिरा हुआ दिव्य पर्वत मेरु राजाकी भाँति सुशोभित होता है। इसकी कान्ति तरुण सूर्य अर्थात् मध्याह्नकालिक सूर्यकी-सी है। यह धूमरहित अग्निके सदृश चमकता रहता है। पृथ्वीके ऊपर इसकी ऊँचाई चौरासी हजार योजन है। यह सोलह हजार योजन-तक पृथ्वीके नीचे धँसा हुआ है और अट्ठाईस हजार योजनतक फैला हुआ है। चारों ओरसे इसका फैलाव विस्तारसे दुगुना है। यह महान् दिव्य पर्वत मेरु दिव्य ओषधियोंसे परिपूर्ण तथा सभी सुवर्णमय भुवनोंसे घिरा हुआ है। इस पर्वतराजपर देवगण, गन्धर्व, असुर और राक्षस सर्वत्र अप्सराओंके साथ रहकर आनन्दका अनुभव करते हैं। यह मेरु प्राणियोंके निमित्त-कारण-भूत भुवनोंसे घिरा हुआ है। इसके विभिन्न पार्श्वभागोंमें चार देश अवस्थित हैं। उनके नाम हैं—(पूर्वमें) भद्राश्व, (दक्षिणमें) भारत, (पश्चिममें) केतुमाल और (उत्तरमें) किये हुए पुण्योंके आश्रयस्थानरूप उत्तरकुरु। इसी प्रकार उसके चारों दिशाओंमें सभी प्रकारके रत्नोंसे विभूषित मन्दर, गन्धमादन, विपुल और सुपार्श्व नामक विष्कम्भ पर्वत भी विद्यमान हैं। उनके ऊपर अरुणोद,

ऋषियोंने पूछा—मुने! पूर्व और पश्चिम दिशामें त जो देश हैं; उनके विषयमें तो आप हमलोगोंको ला चुके। अब उत्तर दिशामें स्थित वर्षों और तोंका वर्णन कीजिये। साथ ही उन पर्वतोंपर निवास करनेवाले लोगोंका चरित्र भी यथार्थ-रूपसे बतलाइये। ऋषियोंद्वारा इस प्रकार कहे जानेपर सूतजीने पुनः उनसे वर्णन करना आरम्भ किया॥ ५८-५९॥

सूत उवाच

शृणुध्वं यानि वर्षाणि पूर्वोक्तानि च वै मया। दक्षिणेन तु नीलस्य निषधस्योत्तरेण तु॥ ६०॥
वर्षं रमणकं नाम जायन्ते यत्र वै प्रजाः।
रतिप्रधाना विमला जायन्ते यत्र मानवाः। शुक्लाभिजनसम्पन्नाः सर्वे ते प्रियदर्शनाः॥ ६१॥
तत्रापि च महावृक्षो न्यग्रोधो रोहिणो महान्। तस्यापि ते फलरसं पिबन्तो वर्तयन्ति हि॥ ६२॥
दशवर्षसहस्राणि दशवर्षशतानि च। जीवन्ति ते महाभागाः सदा हृष्टा नरोत्तमाः॥ ६३॥
उत्तरेण तु श्वेतस्य पार्श्वे शृङ्गस्य दक्षिणे। वर्षं हिरण्वतं नाम यत्र हैरण्वती नदी॥ ६४॥
महाबला महासत्त्वा नित्यं मुदितमानसाः। शुक्लाभिजनसम्पन्नाः सर्वे च प्रियदर्शनाः॥ ६५॥
एकादश सहस्राणि वर्षाणां ते नरोत्तमाः। आयुष्प्रमाणं जीवन्ति शतानि दश पञ्च च॥ ६६॥
तस्मिन् वर्षे महावृक्षो लकुचः पत्रसंश्रयः। तस्य पीत्वा फलरसं तत्र जीवन्ति मानवाः॥ ६७॥
शृङ्गसाह्वस्य शृङ्गाणि त्रीणि तानि महान्ति वै।
एकं मणियुतं तत्र एकं तु कनकान्वितम्। सर्वरत्नमयं चैकं भुवनैरुपशोभितम्॥ ६८॥

सूतजी कहते हैं—ऋषियो! पहले मैं आपलोगोंसे न वर्षोंके विषयमें वर्णन कर चुका हूँ, (उनके तेरिक्त अन्य वर्षोंका वर्णन) सुनिये। नीलपर्वतसे क्षेण और निषध पर्वतसे उत्तर दिशामें रमणक नामक है, जहाँकी प्रजाएँ विशेष विलासिनी एवं स्वच्छ गौर-[वर्ण]वाली होती हैं। वहाँ उत्पन्न हुए सारे मानव गौर-[वर्ण]ी, कुलीन और देखनेमें प्रिय लगनेवाले होते हैं। वहाँ रोहिण नामक एक महान् बरगदका वृक्ष है, उसीके [फल]ोंका रस पान करके वहाँके निवासी जीवन-निर्वाह [कर]ते हैं। वे सभी महान् भाग्यशाली श्रेष्ठ पुरुष सदा [प्रस]न्न रहते हुए ग्यारह हजार वर्षोंतक जीवित रहते [हैं]। श्वेत पर्वतके उत्तर और शृङ्गवान् पर्वतके दक्षिण पार्श्वमें हिरण्वत नामक वर्ष है, जहाँ हैरण्वती नामकी नदी प्रवाहित होती है। वहाँके निवासी श्रेष्ठ मानव, महाबली, महापराक्रमी, नित्य प्रसन्नचित्त, गौरवर्ण, कुलीन और देखनेमें मनोरम होते हैं। वे बारह हजार पाँच सौ वर्षोंकी आयुतक जीवित रहते हैं। उस वर्षमें पत्तोंसे आच्छादित लकुच (बड़हर) का एक महान् वृक्ष है, उसके फलोंका रस पीकर वहाँके मानव जीवन-यापन करते हैं। शृङ्गवान् पर्वतके तीन शिखर हैं, जो बड़े ऊँचे-ऊँचे हैं। उनमेंसे एक मणिसे परिपूर्ण, एक सुवर्णसे सम्पन्न और एक सर्वरत्नमय एवं भुवनोंसे सुशोभित है॥ ६०—६८॥

उत्तरे चास्य शृङ्गस्य समुद्रान्ते च दक्षिणे। कुरवस्तत्र तद्वर्षं पुण्यं सिद्धनिषेवितम्॥ ६९॥
तत्र वृक्षा मधुफला दिव्यामृतमयाऽऽपगाः। वस्त्राणि ते प्रसूयन्ते फलेष्वाभरणानि च॥ ७०॥
सर्वकामप्रदातारः केचिद् वृक्षा मनोरमाः।
अपरे क्षीरिणो नाम वृक्षास्तत्र मनोरमाः। ये क्षरन्ति सदा क्षीरं षड्रसं चामृतोपमम्॥ ७१॥
सर्वा मणिमयी भूमिः सूक्ष्मा काञ्चनवालुका। सर्वत्र सुखसंस्पर्शा निःशब्दाः पवनाः शुभाः॥ ७२॥
देवलोकच्युतास्तत्र जायन्ते मानवाः शुभाः। शुक्लाभिजनसम्पन्नाः सर्वे ते स्थिरयौवनाः॥ ७३॥
मिथुनानि प्रजायन्ते स्त्रियश्चाप्सरसोपमाः। तेषां ते क्षीरिणां क्षीरं पिबन्ति ह्यमृतोपमम्॥ ७४॥

एतच्छ्रुत्वा ऋषीणां तु प्राब्रवील्लोमहर्षणिः । पौराणिकस्तदा सूत ऋषीणां भावितात्मनाम् ॥ ३ ॥
बुद्ध्या विचार्य बहुधा विमृश्य च पुनः पुनः । तेभ्यस्तु कथयामास उत्तरश्रवणं तदा ॥ ४ ॥

प्रसिद्ध पौराणिक लोमहर्षणके पुत्र सूतजीने उन पवित्रात्मा ऋषियोंका प्रश्न सुनकर अपनी बुद्धिसे बारंबार बहुधा विचार-विमर्श करके उन ऋषियोंसे 'उत्तरश्रवण' (उत्तरवर्ती वर्षों) के विषयमें कहना आरम्भ किया ॥

सूत उवाच

अथाहं वर्णयिष्यामि वर्षेऽस्मिन् भारते प्रजाः । भरणाच्च प्रजानां वै मनुर्भरत उच्यते ॥ ५ ॥
निरुक्तवचनाच्चैव वर्षं तद् भारतं स्मृतम् । यतः स्वर्गश्च मोक्षश्च मध्यमश्चापि हि स्मृतः ॥ ६ ॥
न खल्वन्यत्र मर्त्यानां भूमौ कर्मविधिः स्मृतः । भारतस्यास्य वर्षस्य नव भेदान् निबोधत ॥ ७ ॥
इन्द्रद्वीपः कशेरुश्च ताम्रपर्णो गभस्तिमान् । नागद्वीपस्तथा सौम्यो गन्धर्वस्त्वथ वारुणः ॥ ८ ॥
अयं तु नवमस्तेषां द्वीपः सागरसंवृतः । योजनानां सहस्रं तु द्वीपोऽयं दक्षिणोत्तरः ॥ ९ ॥
आयतस्तु कुमारीतो गङ्गायाः प्रवहावधिः । तिर्यगूर्ध्वं तु विस्तीर्णः सहस्राणि दशैव तु ॥ १० ॥
द्वीपो ह्युपनिविष्टोऽयं म्लेच्छैरन्तेषु सर्वशः । यवनाश्च किराताश्च तस्यान्ते पूर्वपश्चिमे ॥ ११ ॥
ब्राह्मणाः क्षत्रिया वैश्या मध्ये शूद्राश्च भागशः । इज्यायुधवणिज्याभिर्वर्तयन्तो व्यवस्थिताः ॥ १२ ॥
तेषां संव्यवहारोऽयं वर्तते तु परस्परम् । धर्मार्थकामसंयुक्तो वर्णानां तु स्वकर्मसु ॥ १३ ॥
सङ्कल्पपञ्चमानां तु आश्रमाणां यथाविधि । इह स्वर्गापवर्गार्थं प्रवृत्तिरिह मानुषे ॥ १४ ॥

सूतजी कहते हैं—ऋषियो ! अब मैं इस भारतवर्षमें उत्पन्न होनेवाली प्रजाओंका वर्णन कर रहा हूँ । इन प्रजाओंकी सृष्टि करने तथा इनका भरण-पोषण करनेके कारण मनुको भरत कहा जाता है। निरुक्त-वचनोंके आधारपर यह वर्ष (उन्हींके नामपर) भारतवर्ष*के नामसे प्रसिद्ध है। यहाँ स्वर्ग, मोक्ष तथा इन दोनोंके अन्तर्वर्ती (भोग) पदकी प्राप्ति होती है । इस भूतलपर भारतवर्षके अतिरिक्त अन्यत्र कहीं भी प्राणियोंके लिये कर्मका विधान नहीं सुना जाता । इस भारतवर्षके नौ भेद हैं, उनके नाम सुनिये— इन्द्रद्वीप, कशेरुमान्, ताम्रपर्ण, गभस्तिमान्, नागद्वीप, सौम्यद्वीप, गान्धर्वद्वीप और वारुण-द्वीप—ये आठ तथा उनमें नवाँ यह समुद्रसे घिरा हुआ भारतद्वीप† (या खण्ड) है। यह द्वीप दक्षिणसे उत्तरतक एक हजार योजनमें फैला हुआ है। इसका विस्तार गङ्गाके उद्गम-स्थानसे लेकर कन्याकुमारी अथवा कुमारी अन्तरीपतक है । यह तिरछेरूपमें ऊपर-ही-ऊपर दस हजार योजन विस्तृत है । इस द्वीपके चारों ओर सीमावर्ती प्रदेशोंमें म्लेच्छ जातियोंकी बस्तियाँ हैं । इसकी पूर्व एवं पश्चिम दिशामें क्रमशः किरात और यवन निवास करते हैं । इसके मध्यभागमें ब्राह्मण, क्षत्रिय, वैश्य और शूद्र विभाग-पूर्वक यज्ञ, शस्त्र-ग्रहण और व्यवसाय आदिके द्वारा जीवन-यापन करते हुए निवास करते हैं । उन चारों वर्णोंका पारस्परिक व्यवहार धर्म, अर्थ और कामसे संयुक्त होता है और वे अपने-अपने कर्मोंमें ही लगे रहते हैं । यहाँ कल्पसहित पाँचों वर्णों (ब्रह्मचर्य, गृहस्थ, वानप्रस्थ, योगी और संन्यासी) तथा आश्रमोंका विधिपूर्वक पालन होता है । इस द्वीपके मनुष्योंकी कर्म-प्रवृत्ति स्वर्ग और मोक्षके लिये होती है ॥ ५-१४ ॥

---

* सभी पुराणोंमें प्रायः सर्वत्र ऋषभ-पुत्र भरतके नामपर ही देशका नाम भारत कहा गया है । नाभिसे अजनाभ तथा उनके पोते भरतसे देशका भारत नाम पड़ा । मनु इनके भी पूर्वज थे, अतः यह कथन भी ठीक है । पर पाश्चात्योंने शकुन्तलापुत्रके नामपर देशका नाम पड़ना गलत बतलाया है और भ्रमसे आज उसीका प्रचार है (विशेष जानकारीके लिये देखिये कल्याण वर्ष ३० । ८) । यह अध्याय वायुपुराण ४५ । ७२-१३७ तथा ब्रह्माण्ड, मार्कण्डेय आदि पुराणोंमें भी प्राप्त है ।

† इस प्रकार आजका दीखनेवाला सारा भूमण्डल बृहत्तर भारतके ही अन्तर्गत सिद्ध होता है । इसीलिये हेमाद्रि संकल्पमें 'भारतवर्षे भरतखण्डे' पढ़ा जाता है ।

कृतमाला ताम्रपर्णी पुष्पजा चोत्पलावती। मलयान्निःसृता नद्यः सर्वाः शीतजलाः शुभा
त्रिषामा ऋषिकुल्या च इक्षुला त्रिदिवाचला। लाङ्गलिनी वंशधरा महेन्द्रतनयाः स्मृता
ऋषीका सुकुमारी च मन्दगा मन्दवाहिनी। कृपा पलाशिनी चैव शुक्तिमत्प्रभवाः स्मृता
सर्वाः पुण्यजलाः पुण्याः सर्वाश्चैव समुद्रगाः। विश्वस्य मातरः सर्वाः सर्वपापहराः शुभाः

शोण, महानदी, नर्मदा, सुरसा, क्रिया, मन्दाकिनी, दशार्णा, चित्रकूटा, तमसा, पिप्पली, श्येनी, करतोया, पिशाचिका, चिमला, चञ्चला, वञ्जुला, वालुवाहिनी, शुक्तिमन्ती, शुनी, लज्जा, मुकुटा और ह्रदिका—ये स्वच्छसलिला कल्याणमयी नदियाँ ऋक्षवन्त (ऋक्षवान्) पर्वतसे उद्भूत हुई हैं। तापी, पयोष्णी (पूर्णानदी या पैनगङ्गा), निर्विन्ध्या, क्षिप्रा, निषधा, वेण्या, वैतरणी, विश्वमाला, कुमुद्वती, तोया, महागौरी, दुर्गा तथा अन्तःशिला—ये सभी पुण्यतोया मङ्गलमयी नदियाँ विन्ध्याचलकी उपत्यकाओंसे निकली हुई हैं। गोदावरी, भीमरथी, कृष्णवेणी, वञ्जुला (मंजीरा), कर्णाटककी तुङ्गभद्रा, सुप्रयोगा, वाह्या (वर्धानदी) और कावेरी—ये सभी दक्षिणापथमें प्रवाहित होनेवाली नदियाँ हैं, जो सह्यपर्वतकी शाखाओंसे प्रकट हुई हैं। कृतमाला (वैगई), ताम्रपर्णी, पुष्पजा (कुसुमाङ्गा, पेम्बै या पेल) और उत्पलावती—ये कल्याणमयी नदियाँ म[लय]से निकली हुई हैं। इनका जल बहुत शीतल है। त्रिषामा, ऋषिकुल्या, इक्षुला, त्रिदिवा, अचल[ा, लाङ्ग]लिनी और वंशधरा—ये सभी नदियाँ महेन्द्रपर्वतसे [निकली] हुई मानी जाती हैं। ऋषीका, सुकुमारी, मन्दवाहिनी, कृपा और पलाशिनी—इन न[दियोंका] उद्गम शुक्तिमान् पर्वतसे हुआ है। ये सभी पु[ण्यसलिला] नदियाँ पुण्यप्रद, सर्वत्र बहनेवाली तथा साक्षा[त् या] परम्परासे समुद्रगामिनी हैं। ये सब-की-सब [विश्वके] लिये माता-सदृश हैं तथा इन सबको कल्याणक[ारिणी] एवं पापहारिणी माना गया है*॥ २५–३३॥

तासां नद्युपनद्यश्च शतशोऽथ सहस्रशः। तास्विमे कुरुपाञ्चालाः शाल्वाश्चैव सजाङ्गलाः॥ ३
शूरसेना भद्रकारा वाह्याः सहपटच्चराः। मत्स्याः किराताः कुल्याश्च कुन्तलाः काशिकोसलाः॥ ३
आवन्ताश्च कलिङ्गाश्च मूकाश्चैवान्धकैः सह। मध्यदेशा जनपदाः प्रायशः परिकीर्तिताः॥ ३
सह्यस्यानन्तरे चैते यत्र गोदावरी नदी। पृथिव्यामपि कृत्स्नायां स प्रदेशो मनोरमः॥ ३
यत्र गोवर्धनो नाम मन्दरो गन्धमादनः। रामप्रियार्थं स्वर्गीया वृक्षा दिव्यास्तथौषधीः॥ ३
भरद्वाजेन मुनिना तत्प्रियार्थेऽवतारिताः। ततः पुष्पवरो देशस्तेन जज्ञे मनोरमः॥ ३
बाह्लीका वाटधानाश्च आभीराः कालतोयकाः। पुरंध्राश्चैव शूद्राश्च पल्लवाश्चात्तखण्डिकाः॥ ४
गान्धारा यवनाश्चैव सिन्धुसौवीरमद्रकाः। शका द्रुह्याः पुलिन्दाश्च पारदाहारमूर्तिकाः॥ ४
रामठाः कण्टकाराश्च कैकेय्या दशनामकाः। क्षत्रियोपनिवेशाश्च वैश्याः शूद्रकुलानि च॥ ४
काम्बोजा दरदाश्चैव बर्बरा पह्लवा तथा। अत्रेयाश्च भरद्वाजाः प्रस्थलाश्च कसेरकाः॥ ४
लम्पकास्तलगानाश्च सैनिकाः सह जाङ्गलैः। एते देशा उदीच्यास्तु प्राच्यान् देशान् निबोधत॥ ४
अङ्गा वङ्गा मद्गुरका अन्तर्गिरिबहिर्गिरी।
ततः प्लवङ्गमातङ्गा यमका मालवर्णकाः। सुह्मोत्तराः प्रविजया मार्गवागेयमालवाः॥ ४
प्राग्ज्योतिषाश्च पुण्ड्राश्च विदेहास्ताम्रलिप्तकाः। शाल्वमागधगोनर्दाः प्राच्या जनपदाः स्मृताः॥ ४

अथवा इनकी सैकड़ों-हजारों छोटी-बड़ी सहायक [नदियाँ हैं] सजाङ्गल, शूरसेन, भद्रकार, बाह्य, सहपटच्चर, मत्स्य नदियाँ भी हैं, जिनके कछारोंमें कुरु, पाञ्चाल, शाल्व, किरात, कुल्य, कुन्तल, काशी, कोसल, आवन्त, कलि[ङ्ग]

* इन नदियोंका पूरा परिचय कल्याण, वामनपुराणाङ्क, पृष्ठ ३८०-२० में द्रष्टव्य है।

† यहाँ पाणिनि अष्टाध्यायीके काशिका (४। १। १६०) कौमुदि (४। १। १७०) उसपदावलीमें दो सूत्रोंका अ... होकर प्रतिलिपिकी भूलसे 'सूरमत्स्य' की जगह 'सूरमस' पाठ हो गया है। 'मागधमदोदधिमें' वर्धमानका पाठ ठीक है।

तथा अवन्ति—ये सभी प्रदेश विन्ध्यपर्वतकी घाटियोंमें स्थित बतलाये जाते हैं। इसके बाद अब मैं उन देशों-का वर्णन कर रहा हूँ, जो पर्वतपर स्थित हैं। उनके नाम हैं—निराहार, सर्वग, कुपथ, अपथ, कुथप्रावरण, ऊर्णादर्व, समुद्गक, त्रिगर्त, मण्डल, किरात और चामर। मुनियोंका कथन है कि इस भारतवर्षमें सत्ययुग, त्रेता, द्वापर और कलियुग—इन चार युगोंकी व्यवस्था है। अब मैं उनके वृत्तान्तका पूर्णतया वर्णन कर रहा हूँ॥

मत्स्य उवाच

एतच्छ्रुत्वा तु ऋषय उत्तरं पुनरेव ते। शुश्रूषवस्तमूचुस्ते प्रकामं लोमहर्षणिम्॥ ५९॥

मत्स्यभगवान्‌ने कहा—राजर्षे! सूतजीद्वारा कहे हुए इस प्रकरणको सुनकर मुनियोंको और भी आगे सुननेकी उत्कट इच्छा उत्पन्न हो गयी, तब वे पुनः लोमहर्षण-पुत्र सूतजीसे बोले॥ ५९॥

ऋषय ऊचुः

यच्च किम्पुरुषं वर्षं हरिवर्षं तथैव च। आचक्ष्व नो यथातत्त्वं कीर्तितं भारतं त्वया॥ ६०॥
जम्बूखण्डस्य विस्तारं तथान्येषां विदांवर। द्वीपानां वासिनां तेषां वृक्षाणां प्रब्रवीहि नः॥ ६१॥
पृष्टस्त्वेवं तदा विप्रैर्यथाप्रश्नं विशेषतः। उवाच ऋषिभिर्दृष्टं पुराणाभिमतं तथा॥ ६२॥

ऋषियोंने पूछा—वेत्ताओंमें श्रेष्ठ सूतजी! आपने भारतवर्षका तो वर्णन कर दिया। अब हमें किम्पुरुषवर्ष तथा हरिवर्षके विषयमें बतलाइये। साथ ही जम्बूखण्डके विस्तारका तथा अन्य द्वीपोंके निवासियोंका एवं वहाँ उद्भत होनेवाले वृक्षोंका भी वर्णन हमें सुनाइये। उन ब्रह्मर्षियोंद्वारा इस प्रकार पूछे जानेपर सूतजीने उनके प्रश्नके अनुकूल जैसा देखा था तथा जो पुराण-सम्मत था, वैसा उत्तर देना प्रारम्भ किया॥ ६०—६२॥

बाधा नहीं पहुँचाती। न उन्हें भूख लगती है और न थकावट ही प्रतीत होती है तथा न किसी प्रकारका दुःख ही होता है। वहाँ जाम्बूनद नामक सुवर्ण पाया जाता है, जो देवताओंके लिये आभूषणके काममें आता है। वह इन्द्रगोप (बीरबहूटी) के समान लाल और अत्यन्त चमकीला होता है। उस वर्षके सभी वृक्षोंमें इस जामुन-वृक्षके फलोंका रस परम शुभकारक है। वह वृक्षसे टपकनेपर निर्मल सुवर्ण बन जाता है, जिससे देवताओंके आभूषण बनते हैं। ईश्वरकी कृपासे वहाँकी भूमि आठों दिशाओंमें सब ओर इलावृत-निवासियोंके मूत्र, विष्ठा और मृत शरीरोंको आत्मसात् कर लेती है। राक्षस, पिशाच और यक्ष—ये सभी हिमालय पर्वतपर निवास करते हैं। हेमकूट पर्वतपर अप्सराओंसहित गन्धर्वोंका निवास जानना चाहिये तथा शेष, वासुकि और तक्षक आदि सभी प्रधान नाग भी उसपर स्थित रहते हैं। महामेरुपर यज्ञसम्बन्धी मङ्गलमय तैंतीस देवता क्रीडा करते रहते हैं। नीलम एवं वैदूर्य मणियोंसे सम्पन्न नीलपर्वतपर सिद्धों और ब्रह्मर्षियोंका निवास है। श्वेतपर्वत दैत्यों और दानवोंका निवासस्थान बतलाया जाता है। पर्वतश्रेष्ठ शृङ्गवान् पितरोंका विहारस्थल है। इस प्रकार मैंने भारतवर्षके अन्तर्गत इन नौ वर्षोंका वर्णन कर दिया। इनमें प्राणी निवास करते हैं। ये परस्पर गतिमान् और स्थिर हैं। देवताओं और मनुष्योंने अनेकों प्रकारसे इनकी वृद्धि देखी है। उनकी गणना करना असम्भव है, अतः मङ्गलार्थी मनुष्यको इनपर श्रद्धा रखनी चाहिये ॥ ७४—८७ ॥

इस प्रकार श्रीमत्स्यमहापुराणके भुवनकोष-वर्णनमें एक सौ चौदहवाँ अध्याय सम्पूर्ण हुआ ॥ ११४ ॥

एक सौ पंद्रहवाँ अध्याय

राजा पुरूरवाके पूर्वजन्मका वृत्तान्त

मनुरुवाच

चरितं बुधपुत्रस्य जनार्दन मया श्रुतम्। श्रुतः श्राद्धविधिः पुण्यः सर्वपापप्रणाशनः ॥ १ ॥
धेन्वाः प्रसूयमानायाः फलं दानस्य मे श्रुतम्। कृष्णाजिनप्रदानं च वृषोत्सर्गस्तथैव च ॥ २ ॥
श्रुत्वा रूपं नरेन्द्रस्य बुधपुत्रस्य केशव। कौतूहलं समुत्पन्नं तन्ममाचक्ष्व पृच्छतः ॥ ३ ॥
केन कर्मविपाकेन स तु राजा पुरूरवाः। अवाप तादृशं रूपं सौभाग्यमपि चोत्तमम् ॥ ४ ॥
देवांस्त्रिभुवनश्रेष्ठान् गन्धर्वांश्च मनोरमान्। उर्वशी संगता त्यक्त्वा सर्वभावेन तं नृपम् ॥ ५ ॥

मनुने पूछा—जनार्दन! मैंने आपके मुखसे बुधपुत्र राजा पुरूरवाका जीवन-चरित्र तो सुना और समस्त पापोंका विनाश करनेवाली पुण्यमयी श्राद्धविधिका भी श्रवण किया तथा ब्याती हुई गौके दानका, काले मृग-चर्मके दानका एवं वृषोत्सर्गका भी फल सुन लिया, परंतु केशव! बुधपुत्र नरेश्वर पुरूरवाके रूपको सुनकर मुझे महान् कौतूहल उत्पन्न हो गया है, इसीलिये पूछ रहा हूँ। अब आप मुझे यह बतलाइये कि किस कर्मके परिणामस्वरूप राजा पुरूरवाको वैसा सुन्दर रूप और उत्तम सौभाग्य प्राप्त हुआ था? (जिसपर मोहित होकर अप्सराओंमें श्रेष्ठ) उर्वशी त्रिलोकीमें श्रेष्ठ देवताओं और सौन्दर्यशाली गन्धर्वोंका त्याग करके सब प्रकारसे राजा पुरूरवाकी सङ्गिनी बनी थी ॥ १—५ ॥

मत्स्य उवाच

शृणु कर्मविपाकेन येन राजा पुरूरवाः। अवाप तादृशं रूपं सौभाग्यमपि चोत्तमम् ॥ ६ ॥
अतीते जन्मनि पुरा योऽयं राजा पुरूरवाः। पुरूरवा इति ख्यातो मद्रदेशाधिपो हि सः ॥ ७ ॥
चाक्षुषस्यान्वये राजा चाक्षुषस्यान्तरे मनोः। स वै नृपगुणैर्युक्तः केवलं रूपवर्जितः ॥ ८ ॥

लय पर्वतकी ओर प्रस्थान किया। उस समय तपरूप ाय ही उसका सहायक था। वह महायशस्वी नरेश थानोंका दर्शन करनेकी लालसासे पैदल ही चल रहा आगे बढ़नेपर उसने अपने देशकी सीमापर ऐरावती ी) नामसे विख्यात अत्यन्त मनोहारिणी नदीको देखा। वह नदी हिमालय पर्वतसे निकली हुई थी, अथाह जलके कारण गम्भीर वेगसे प्रवाहित हो रही थी, उसका ज चन्द्रमाके समान शीतल था और वह वर्फकी राशि-सरीखे उज्ज्वल प्रतीत हो रही थी। वर्फसदृश निर्मल यशवाले राजा पुरूरवाने उस नदीको देखा॥ १०–१९॥

इस प्रकार श्रीमत्स्यमहापुराणमें तपोवनागमन नामक एक सौ पंद्रहवाँ अध्याय सम्पूर्ण हुआ॥ ११५॥

एक सौ सोलहवाँ अध्याय

ऐरावती नदीका वर्णन

सूत उवाच

स ददर्श नदीं पुण्यां दिव्यां हैमवतीं शुभाम्। गन्धर्वैश्च समाकीर्णां नित्यं शक्रेण सेविताम्॥ १॥
सुरेभमदसंसिक्तां समंतात् तु विराजिताम्। मध्येन शक्रचापाभां तस्मिन्नहनि सर्वदा॥ २॥
तपस्विशरणोपेतां महाब्राह्मणसेविताम्। ददर्श तपनीयाभां महाराजः पुरूरवाः॥ ३॥
सितहंसावलिच्छन्नां काशचामरराजिताम्। साभिषिक्तामिव सतां पश्यन् प्रीतिं परां ययौ॥ ४॥
पुण्यां सुशीतलां हृद्यां मनसः प्रीतिवर्धिनीम्। क्षयवृद्धियुतां रम्यां सोममूर्तिमिवापराम्॥ ५॥
सुशीतशीघ्रपानीयां द्विजसंघनिषेविताम्। सुतां हिमवतः श्रेष्ठां चञ्चद्वीचिविराजिताम्॥ ६॥
अमृतस्वादुसलिलां तापसैरुपशोभिताम्। स्वर्गारोहणनिःश्रेणीं सर्वकल्मषनाशिनीम्॥ ७॥
अर्घ्यां समुद्रमहिषीं महर्षिगणसेविताम्। सर्वलोकस्य चौत्सुक्यकारिणीं सुमनोहराम्॥ ८॥
हितां सर्वस्य लोकस्य नाकमार्गप्रदायिकाम्। गोकुलाकुलतीरान्तां रम्यां शैवालवर्जिताम्॥ ९॥
हंससारससंघुष्टां जलजैरुपशोभिताम्। आवर्तनाभिगम्भीरां द्वीपोरुजघनस्थलीम्॥ १०॥
नीलनीरजनेत्राभामुत्फुल्लकमलाननाम्।
हिमाभफेनवसनां चक्रवाकाधरां शुभाम्। बलाकापङ्क्तिदशनां चलन्मत्स्यावलिभ्रुवम्॥ ११॥
स्वजलोद्भूतमातङ्गरम्यकुम्भपयोधराम्। हंसनूपुरसंघुष्टां मृणालवलयावलीम्॥ १२॥

सूतजी कहते हैं—ऋषियो! वह मङ्गलकारिणी काश-पुष्परूपी चँवरसे सुशोभित और समुद्रोंद्वारा

ताओंके समान सुन्दर एवं पवित्र अङ्गोंवाले एवं कमल और चन्द्रमाकी-सी मुखवाली स्त्रियाँ भी पायी जाती थीं, जो देवगणों, तंगली जातियों), नृपसमूहों और व्याघ्रदलोंसे र्थात् परम पवित्र जल धारण करती थी, क जल धारण करनेके कारण तारिकाओं-र्मल आकाशके समान सुशोभित तथा अभीष्ट कामनाओंको पूर्ण करनेवाली थी, हुए राजा पुरूरवा आगे बढ़े। जिस नदीके तीरभूमिमें उगे हुए पूर्णिमाके चन्द्रमाकी समान उज्ज्वल काश-पुष्पों तथा अनेकों शाल वृक्षोंसे सुशोभित थे, जो सदा विविध ब्राह्मणों और देवताओंसे सुसेवित थी, जो सदा भक्तजनोंके सम्पूर्ण पापोंका शीघ्र ही विनाश क देती थी, जिसमें बहुत-सी छोटी-छोटी नदियाँ आक मिली थीं, जो निरन्तर मुनीश्वरोंद्वारा सेवित थी, ज पुत्रकी तरह मनुष्योंका पालन करती थी, जो सदा हि (बर्फ) राशिसे आच्छादित रहती थी, जो निरन्तर देवगणों संयुक्त रहती थी, अपना कल्याण करनेके लिये मनुष जिसका आश्रय लेते थे, जिसके किनारे झुंड-के-झुं सिंह घूमते रहते थे, जो हाथी-समूहोंसे सेवित थ जिसका जल कल्पवृक्षके पुष्पोंसे युक्त और सुवर्णक समान चमकीला था तथा जिसके तटवर्ती कदम्ब-वृ सूर्यकी किरणोंके तापसे बढ़े हुए थे—ऐसी ऐराव नदीको चन्द्रमा-सरीखे निर्मल यशवाले राजा पुरूरवा देखा ॥ १३—२५ ॥

इस प्रकार श्रीमत्स्यमहापुराणके भुवनकोष-वर्णनप्रसंगमें सुरनदी-वर्णन नामक एक सौ सोलहवाँ अध्याय सम्पूर्ण हुआ ॥ ११६ ॥

एक सौ सत्रहवाँ अध्याय

हिमालयकी अद्भुत छटाका वर्णन

सूत उवाच

...कयन् नदीं पुण्यां तत्समीरहृतश्रमः। स गच्छन्नेव ददृशे हिमवन्तं महागिरिम् ॥ १ ॥
...लिखद्भिर्बहुभिर्वृतं शृङ्गैस्तु पाण्डुरैः। पक्षिणामपि सञ्चारैर्विना सिद्धगतिं शुभाम् ॥ २ ॥
...वाहसञ्जातमहाशब्दैः समन्ततः। असंश्रुतान्यशब्दं तं शीततोयं मनोरमम् ॥ ३ ॥
...रुवने नीलैः कृताधोवसनं शुभम्। मेघोत्तरीयकं शैलं ददृशे स नराधिपः ॥ ४ ॥
...मेघकृतोष्णीषं चन्द्रार्कमुकुटं क्वचित्। हिमानुलिप्तसर्वाङ्गं क्वचिद् धातुविमिश्रितम् ॥ ५ ॥
चन्दनेनानुलिप्ताङ्गं दत्तपञ्चाङ्गुलं यथा।
...प्रदं निदाघेऽपि शिलाविकटसङ्कटम्। सालक्तकैरप्सरसां मुद्रितं चरणैः क्वचित् ॥ ६ ॥
...वेत् संस्पृष्टसूर्यांशुं क्वचिच्च तमसावृतम्। दरीमुखैः क्वचिद् भीमैः पिबन्तं सलिलं महत् ॥ ७ ॥
...चिद् विद्याधरगणैः क्रीडद्भिरुपशोभितम्। उपगीतं तथा मुख्यैः किन्नराणां गणैः क्वचित् ॥ ८ ॥
...नभूमौ गलितैर्गन्धर्वाप्सरसां क्वचित्। पुष्पैः संतानकादीनां दिव्यैस्तमुपशोभितम् ॥ ९ ॥
...थिताभिः शय्याभिः कुसुमानां तथा क्वचित्। मृदिताभिः समाकीर्णं गन्धर्वाणां मनोरमम् ॥ १० ॥
...द्रुपवनैर्देशैर्नीलशाद्वलमण्डितैः। क्वचिच्च कुसुमैर्युक्तमत्यन्तरुचिरं शुभम् ॥ ११ ॥

...जी कहते हैं—ऋषियो! ऐरावती नदीके जलका ...के बहती हुई वायुके स्पर्शसे राजा पुरूरवाकी थकावट दूर हो गयी थी। वे उस पुण्यमयी नदीको देखते हुए आगे बढ़ रहे थे। इतनेमें उन्हें महान्

दीख रही थी, जिसके तटवर्ती प्रदेश निकुञ्जों और तपस्वियोंसे अलंकृत थे, जिससे उत्पन्न हुए रत्नोंसे त्रिलोकी अलंकृत होती है, वासुकि आदि बड़े-बड़े नागोंके आश्रयस्थान, सत्पुरुषोंद्वारा सेवित तथा रत्न-सम्पत्तियोंसे परिपूर्ण उस पर्वतको कोई सत्पुरुष ही देख सकता है। जहाँ तपस्वीलोग थोड़े ही तपसे सिद्धि प्राप्त कर लेते हैं। जिसके दर्शनमात्रसे सारा पाप नष्ट हो जाता है। जिसके किन्हीं-किन्हीं स्थलोंपर वायुद्वारा लाये गये बड़े-बड़े झरनोंके गिरनेसे उत्पन्न हुए छोटे-छोटे झरनोंके जलसे पर्वतीय प्रदेश तृप्त होते हैं। वहीं उसके ऊँचे-ऊँचे शिखर जलसे आप्लावित थे तथा कहीं सूर्यके तापसे संतप्त होनेके कारण अगम्य थे। वहाँ केवल मनसे ही जाया जा सकता था। जो कहीं-कहीं देवदारुके विशाल वृक्षोंकी शाखा-प्रशाखाओंसे घनीभूत हुए तथा वहीं बाँसोंकी झुरमुटरूपी वनोंके आकारसे युक्त प्रदेशोंसे सुशोभित था। कहीं छत्तेके समान बड़े-बड़े शिखर बर्फसे आच्छादित थे, कहीं सैकड़ों झरने झर रहे थे, कहीं जलके गिरनेसे उत्पन्न हुए शब्दोंसे ही जलकी प्रतीति होती थी, कहीं गुफाएँ बर्फसे ढकी हुई थीं। इस प्रकार सुन्दर नितम्बरूपी भूमिसे युक्त उस हिमालय पर्वतको देखकर महानुभाव मद्रेश्वर पुरूरवा हर्षपूर्वक वहीं (अपने मनोऽनुकूल स्थानकी खोज करते हुए) घूमने लगे। तब उन्हें एक स्थान प्राप्त हुआ ॥ १२—२१ ॥

इस प्रकार श्रीमत्स्यमहापुराणके भुवनकोषवर्णनमें हिमवद्वर्णन नामक एक सौ सत्रहवाँ अध्याय सम्पूर्ण हुआ ॥ ११७ ॥

एक सौ अठारहवाँ अध्याय

हिमालयकी अनोखी शोभा तथा अत्रि-आश्रमका वर्णन

सूत उवाच

पर्वतेन्द्रस्य प्रदेशं सुमनोरमम्। अगम्यं मानुषैरन्यैर्दैवयोगादुपागतः ॥ १ ॥
वती सरिच्छ्रेष्ठा यस्माद् देशाद् विनिर्गता। मेघश्यामं च तं देशं द्रुमषण्डैरनेकशः ॥ २ ॥
शालैस्तालैस्तमालैश्च कर्णिकारैः सशाल्मलैः। न्यग्रोधैश्च तथाश्वत्थैः शिरीषैः शिंशपाद्रुमैः ॥ ३ ॥
श्लेष्मातकैरामलकैर्हरीतकविभीतकैः। भूर्जैः समुञ्जकैर्वाणैर्वृक्षैः सप्तच्छदद्रुमैः ॥ ४ ॥
महानिम्बैस्तथा निम्बैर्निर्गुण्डीभिर्हरिद्रुमैः। देवदारुमहावृक्षैस्तथा कालेयकद्रुमैः ॥ ५ ॥
पद्मकैश्चन्दनैर्बिल्वैः कपित्थै रक्तचन्दनैः। आम्रातारिष्टकाक्षोटैर्लकुचैश्च तथार्जुनैः ॥ ६ ॥
हस्तिकर्णैः सुमनसैः कोविदारैः सुपुष्पितैः। प्राचीनामलकैश्चापि धनकैः समपाटलैः ॥ ७ ॥
खर्जूरैर्नारिकेलैश्च प्रियालाम्रातकेङ्गुदैः। तन्तुमालैर्यवैर्भव्यैः काश्मरीपर्णिभिस्तथा ॥ ८ ॥
जातीफलैः पूगफलैः कटुफलैर्वल्लीफलैः। मन्दारैः कोविदारैश्च किंशुकैः कुङ्कुमांशुकैः ॥ ९ ॥
यवासैः शमिपर्णासैर्वेतसैरम्बुवेतसैः। रक्तातिरक्तनारङ्गैर्हिङ्गुभिः सप्रियङ्गुभिः ॥ १० ॥

सूतजी कहते हैं—ऋषियो ! दैवयोगसे महाराज ... समान श्यामल था तथा अनेकों प्रकारके वृक्षसमूहोंसे ... रूरवा उसी पर्वतराजके परम सुरम्य प्रदेशमें पहुँच गया हुआ था। वहाँ शाल (साखू), ताल (ताड़),

(छोटी जामुन या कठजामुन), नृपजम्बू (बड़ी जामुन), बिजौरा, कपूर, गुरु, अगुरु, बिम्ब (एक फल), प्रतिबिम्ब और संतानक वृक्ष (कल्पवृक्ष) वितानकी तरह फैले हुए थे ॥ ११—२० ॥

तथा गुग्गुलवृक्षैश्च हिन्तालधवलेक्षुभिः । तृणशून्यैः करवीरैरशोकैश्चक्रमर्दनैः ॥ २१ ॥
पीलुभिर्धातकीभिश्च चिरिबिल्वैः समाकुलैः । तिन्तिडीकैस्तथा लोध्रैर्विडङ्गैः क्षीरिकाद्रुमैः ॥२२॥
अश्मन्तकैस्तथा कालैर्जम्बीरैः श्वेतकद्रुमैः । भल्लातकैरिन्द्रयवैर्वल्गुजैः सिन्दुवारकैः ॥ २३ ॥
करमर्दैः कासमर्दैरविष्टकवरिष्टकैः । रुद्राक्षैर्द्राक्षसम्भूतैः सप्ताह्वैः पुत्रजीवकैः ॥ २४ ॥
कङ्कोलकैर्लवङ्गैश्च त्वग्द्रुमैः पारिजातकैः । प्रतानैः पिप्पलीनां च नागवल्यश्च भागशः ॥ २५ ॥
मरीचस्य तथा गुल्मैर्नवमल्लिकया तथा । मृद्वीकामण्डपैर्मुख्यैरतिमुक्तकमण्डपैः ॥ २६ ॥
त्रपुषैर्नर्तिकानां च प्रतानैः सफलैः शुभैः । कूष्माण्डानां प्रतापैश्च अलाबूनां तथा क्वचित् ॥ २७ ॥
चिर्भिटस्य प्रतानैश्च पटोलीकारवेल्लकैः । कर्कोटकीवितानैश्च वर्ताकैर्बृहतीफलैः ॥ २८ ॥
कण्टकैर्मूलकैर्मूलशाकैस्तु विविधैस्तथा । कह्लारैश्च विदार्या च रुरूटैः स्वादुकण्टकैः ॥ २९ ॥
सभाण्डीरविदूसारराजजम्बूकवालुकैः । सुवर्चलाभिः सर्वाभिः सर्षपाभिस्तथैव च ॥ ३० ॥
काकोलीक्षीरकाकोली छत्रया चातिच्छत्रया । कासमर्दीसहासद्भिः सकन्दलसकाण्डकैः ॥ ३१ ॥
तथा क्षीरकशाकेन कालशाकेन चाप्यथ । शिम्बीधान्यैस्तथा धान्यैः सर्वैर्निरवशेषतः ॥ ३२ ॥

गुग्गुलवृक्ष, हिंताल, श्वेत ईख, केतकी, कनेर, [illegible], चक्रमर्दन (चकवड़), पीलु, धातकी (धव), चिलविल, तिन्तिडीक (इमली), लोध, विडंग, [illegible] (खिरनी), अश्मन्तक (लहसोड़ा), काल (रक्तचित्र-नामका एक वृक्ष), जम्बीर, श्वेतक (वरुण या वरना नामक एक वृक्षविशेष), भल्लातक (भिलावा), इन्द्रयव, वल्गुज (सोमराजी नामसे प्रसिद्ध), सिन्दुवार, करमर्द (करौंदा), कासमर्द (कसौंदी), अविष्टक (मिर्च), वरिष्टक (हुरहुर), रुद्राक्षके वृक्ष, अंगूरकी लता, सप्तपर्ण, पुत्रजीवक (पतजुग), कंकोलक (शीतलचीनी), लौंग, त्वग्द्रुम (दालचीनी) और पारिजातके वृक्ष लहलहा रहे थे। कहीं पिप्पली (पीपर) तथा कहीं नागवल्लीकी लताएँ फैली हुई थीं। कहीं काली मिर्च और नवमल्लिकाकी लताओंके कुञ्ज बने हुए थे। कहीं अंगूर और माधवीकी लताओंके मण्डप शोभा पा रहे थे। कहीं फलोंसे लदी हुई नीले रंगके फूलोंवाली लताएँ, कहीं कुम्हड़े तथा कद्दूकी लताएँ और कहीं घुँघुची, परवल, करैला एवं कर्कोटकी (पीतघोषा) की लताएँ शोभा दे रही थीं। कहीं बैगन और भटकटैयाके फल, मूली, जड़वाले शाक तथा अनेकों प्रकारके काँटेदार वृक्ष शोभा पा रहे थे। कहीं श्वेत कमल, कंदविदारी, रुरूट (एक फलदार वृक्ष), स्वादुकण्टक, (सफेद पिंडालु), भाण्डीर (एक प्रकारका वट), विदूसार (विदारकन्द), राजजम्बूक (बड़ी जामुन), वालुक (एक प्रकारका आँवला), सुवर्चला (सूर्यमुखी) तथा सभी प्रकारके सरसोंके पौधे भी विद्यमान थे। काकोली (कंकोल), क्षीरकाकोली (कंकोलका एक भेद), छत्रा (छत्ता), अतिच्छत्रा (तालमखाना), कासमर्दी (अडूसा), कन्दल (केलेका एक भेद), काण्डक (करैला), क्षीरशाक (दूधी), कालशाक (करेमू) नामक शाकों, सेमकी लताओं तथा सभी प्रकारके अन्नोंके पौधोंसे वह सारा प्रदेश सुशोभित हो रहा था ॥ २१—३२ ॥

औषधीभिर्विचित्राभिर्दीप्यमानाभिरेव च । आयुष्याभिर्यशस्याभिर्वल्याभिश्च नराधिप ॥ ३३ ॥
जरामृत्युभयघ्नीभिः क्षुद्भयघ्नीभिरेव च । सौभाग्यजननीभिश्च कृत्स्नाभिश्चाप्यनेकशः ॥ ३४ ॥
तत्र वेणुलताभिश्च तथा कीचकवेणुभिः । काशैः शशाङ्ककाशैश्च शरगुल्मैस्तथैव च ॥ ३५ ॥

गोक्ष्वेडकांस्तथा कुम्भान् धार्तराष्ट्राञ्छुकान् बकान् । घातुकांश्चक्रवाकांश्च कटाकूण्टिट्टिभान् भटान्॥ ५१ ॥
पुत्रप्रियाँल्लोहपृष्ठान् गोचर्मगिरिवर्तकान् । पारावतांस्त्र कमलान् सारिकाञ्जीवजीवकान् ॥ ५२ ॥
लाववर्तकवार्ताकान् रक्तवर्मप्रभद्रकान् । ताम्रचूडान् स्वर्णचूडाङ्कुक्कुटान् काष्ठकुक्कुटान् ॥ ५३ ॥
कपिञ्जलाङ्कलविङ्कांस्तथा कुङ्कुमचूडकान् । भृङ्गराजान् सीरपादान् भूलिङ्गाण्डिण्डिमान् नवान् ॥ ५४ ॥
मञ्जुलीतकदात्यूहान् भारद्वाजांस्तथा चषान् । एतांश्चान्यांश्च सुबहून् पक्षिसङ्घान् मनोहरान् ॥ ५५ ॥

नरेन्द्र ! (यहाँतक कि) नागलोक, स्वर्गलोक, मृत्युलोक, जलप्रा स्थान तथा वनमें उत्पन्न होनेवाला ऐसा कोई भी अनाज, धान्य, शाक, फल, मूल, कन्द और फूल नहीं था, जो वहाँ विद्यमान न हो अर्थात् सभी प्राप्य थे। वहाँके वृक्ष ऋतुओंके अनुकूल सदा फूलों और फलोंसे लदे रहते थे। मद्रेश्वर पुरूरवाने अपनी तपस्याके प्रभावसे उस वनप्रान्तको देखा। राजाको वहाँ अनेकों प्रकारके रूप-रंगवाले पक्षी भी दीख पड़े। जैसे मोर, शतपत्र (कठफोरवा), कलविंक (गौरैया), कोयल, कादम्बक (कलहंस), हंस, कोयष्टि (जलकुक्कुट), खंजरीट (खिड़रिच), कुरर (कराँकुल), कालकूट (जलकौआ), लोभी खट्वाङ्ग (पक्षी विशेष), गोक्ष्वेडक (हारिल), कुम्भ (डोम कौआ), धार्तराष्ट्र (काली चोंच और काले पैरोंवाले हंस), तोते, बगुले, निष्ठुर चक्रवाक, कटाकू (कर्कश ध्वनि करनेवाले विशेष पक्षी), टिटिहिरी, भट (तीतर), पुत्रप्रिय (शरभ), लोहपृष्ठ (श्वेत चील्ह), गोचर्म (चरखा), गिरिवर्तक (बतख), कबूतर, कमल (सारस), मैना, जीवजीवक (चकोर), लवा, वर्तक (बटेर), वार्ताक (बटेरोंकी एक जाति), रक्तवर्म (मुर्गा), प्रभद्रक (हंसका एक भेद), ताम्रचूड (लाल शिखावाले मुर्गे), स्वर्णचूड (स्वर्ण-सदृश शिखावाले मुर्गे), सामान्य मुर्गे, काष्ठकुक्कुट (मुर्गेका एक भेद), कपिञ्जल (पपीहा), कलविंक (गौरैया), कुङ्कुमचूड (केसर-सरीखी शिखावाले पक्षी), भृङ्गराज (पक्षिविशेष), सीरपाद (बड़ा सारस), भूलिंग (भूमिमें रहनेवाले पक्षी), डिण्डिम (हारिल पक्षीकी एक जाति), नव (काक), मञ्जुलीतक (चील्हकी जातिविशेष), दात्यूह (जलकाक), भारद्वाज (भरदूल) तथा चाष (नीलकण्ठ)—इन्हें तथा इनके अतिरिक्त अन्यान्य बहुत-से मनोहर पक्षिसमूहोंको राजाने देखा ॥ ४६—५५ ॥

श्वापदान् विविधाकारान् मृगांश्चैव महामृगान् । व्याघ्रान् केसरिणः सिंहान् द्वीपिनः शरभान् वृकान् ॥५६॥
ऋक्षांस्तरक्षूंश्च बहून् गोलाङ्गूलान् सवानरान् । शशलोमान् सकादम्बान् मार्जारान् वायुवेगिनः ॥ ५७ ॥
तथा मत्तांश्च मातङ्गान् महिषान् गवयान् वृषान् । चमरान् सृमरांश्चैव तथा गौरखरानपि ॥ ५८ ॥
उरभ्रांश्च तथा मेषान् सारङ्गानथ कूकुरान् । नीलांश्चैव महानीलान् करालान् मृगमातृकान्॥ ५९ ॥
सदंष्ट्रालोमशरभान् क्रोष्ट्राकारकशम्बरान् । करालान् कृतमालांश्च कालपुच्छांश्च तोरणान् ॥ ६० ॥
उष्ट्रान् खड्गान् वराहांश्च तुरङ्गान् खरगर्दभान् । एतानद्रिष्टान् मद्रेशो विरुद्धांश्च परस्परम् ॥ ६१ ॥
अविरुद्धान् वने दृष्ट्वा विस्मयं परमं ययौ । तच्चाश्रमपदं पुण्यं बभूवात्रेः पुरा नृप ॥ ६२ ॥
तत्प्रसादात् प्रभायुक्तं स्थावरैर्जङ्गमैस्तथा । हिंसन्ति हि न चान्योन्यं हिंसकास्तु परस्परम्॥ ६३ ॥

इसी प्रकार राजाको वहाँ विभिन्न रूप-रंगवाले जंगली जीव भी देखनेको मिले। जैसे—हिरन, बारह- [illegible] (सुरा गाय), सृमर (बालमृग), [illegible] रंगके गधे, भेंड़, भेड़ [illegible]

फल भी सफलताको प्राप्त करते रहते हैं। वह श्रेष्ठ आश्रम सदा भ्रमरोंकी गुंजारसे गुंजायमान एवं देवाङ्गनाओंसे सुसेवित तथा उस पर्वतके प्रहरीकी तरह सम्पूर्ण पापोंका विनाशक था। नरेश्वर! एक स्थानसे दूसरे स्थानपर क्रीडा करते हुए बन्दरोंने वहाँकी बर्फराशिको चाँदनीके समान उज्ज्वल बना दिया था। वह आश्रम चारों ओरसे हिमाच्छादित कन्दराओं और कँकरीले-पथरीले मार्गोंसे घिरा हुआ था, इसलिये वह मनुष्योंके लिये सदा : था। पूर्वजन्मकी आराधनाके प्रभावसे युक्त मह पुरूरवा देवाधिदेव भगवान्‌की कृपासे उस आः पहुँचे थे। वह आश्रम थकावटको दूर करनेवाला, मन मनोमोहक पुष्पोंसे अलंकृत, स्वयं महर्षिद्वारा सुन्दर निर्मित, मङ्गलमय एवं शुभकारक था, उसे मह पुरूरवाने देखा ॥ ६४—७७ ॥

इस प्रकार श्रीमत्स्यमहापुराणके भुवनकोश-वर्णन-प्रसङ्गमें अत्रि-आश्रमवर्णन नामक एक सौ अठारहवाँ अध्याय सम्पूर्ण हुआ ॥ ११८ ॥

एक सौ उन्नीसवाँ अध्याय

आश्रमस्थ विवरमें पुरूरवा*का प्रवेश, आश्रमकी शोभाका वर्णन तथा पुरूरवाकी तपस्या

सूत उवाच

तत्र यौ तौ महाशृङ्गौ महावर्णौ महाहिमौ। तृतीयं तु तयोर्मध्ये शृङ्गमत्यन्तमुच्छ्रितम् ॥ १
नित्यातप्तशिलाजालं सदाभ्रपरिवर्जितम्। तस्याधस्ताद् वृक्षगणो दिशां भागे च पश्चिमे ॥ २
जातीलतापरिक्षिप्तं विवरं चारुदर्शनम्। दृष्ट्वैव कौतुकाविष्टस्तं विवेश महीपतिः ॥ ३
तमसा चातिनिबिडं नल्वमात्रं सुसंकटम्। नल्वमात्रमतिक्रम्य स्वप्रभाभरणोज्ज्वलम् ॥ ४ ॥
तमुच्छ्रितमथात्यन्तं गम्भीरं परिवर्तुलम्। न तत्र सूर्यस्तपति न विराजति चन्द्रमाः ॥ ५ ॥
तथापि दिवसाकारं प्रकाशं तदहर्निशम्। क्रोशाधिकपरीमाणं सरसा च विराजितम् ॥ ६ ॥
समंतात् सरसस्तस्य शैललग्ना तु वेदिका। सौवर्णैं राजतैर्वृक्षैर्विद्रुमैरुपशोभितम् ॥ ७ ॥
नानामाणिक्यकुसुमैः सुप्रभाभरणोज्ज्वलैः। तस्मिन् सरसि पद्मानि पद्मरागच्छदानि तु ॥ ८ ॥
वज्रकेशरजालानि सुगन्धीनि तथा युतम्। पत्रैर्मरकतैर्नीलैर्वैदूर्यस्य महीपते ॥ ९ ॥
कर्णिकाश्च तथा तेषां जातरूपस्य पार्थिव।

सूतजी कहते हैं—ऋषियो! वहाँ सदा हिमाच्छादित तथा रंग-बिरंगे जो दो महान् शिखर थे, उनके बीचमें एक तीसरा शिखर था, जो अत्यन्त ऊँचा था। वह बादलोंसे सदा शून्य रहता था, जिससे उसकी शिलाएँ नित्य संतप्त बनी रहती थीं। उस शिखरके नीचे पश्चिम दिशामें वृक्षोंके समूह शोभा पा रहे थे। उन्हींके बीचमें एक अत्यन्त सुन्दर विवर (छिद्र) था, जो मालतीकी लताओंसे आच्छादित था। उसे देखते ही राजा पुरूरवा आश्चर्यचकित हो गये। तत्पश्चात् उन्होंने उस विवरमें प्रवेश किया। वह मार्ग चार सौ हाथ (एक फर्लांग) तक घने अन्धकारसे समावृत होनेके कारण अत्यन्त संकटमय था। उस चार सौ हाथकी दूरीको पार कर लेनेपर राजा ऐसे स्थानपर पहुँचे, जो अपनी कान्तिसे ही उद्भासित हो रहा था। वह स्थान ऊँचा, अत्यन्त गम्भीर और गोलाकार था तथा एक कोसके विस्तारवाला था। यद्यपि वहाँ न सूर्य तपते थे न चन्द्रमा ही

* इस पुराणमें—यजुर्वेद ५। २, ऋग्वेद १०। ९५, शतपथ०ब्रा० ११। ५ आदिमें संकथित पुरूरवाके कथानकका सर्वाधिक विस्तारसे उपबृंहण हुआ है और कई बार उसकी पुनरुक्ति भी हुई है। इससे विक्रमोर्वशीयमें कालिदास एवं पार्जीटर आदि आधुनिक पाश्चात्य विद्वान् लेखक बहुत प्रभावित हैं। निघण्टु ५। ४ तथा यास्कीय निरुक्त १०। ४६ एवं ऋग्वेद ८। ५। २। २के अनुसार ये पुरूरवा सूर्य या मूल प्राणतत्त्व हैं। पाणि० ६। ३। १३७ के अनुसार यहाँ 'पुरु' में दीर्घ हुआ है।

न क्षिणोति यथा कण्ठं कुक्षिं नापूरयत्यपि। तृप्तिं विधत्ते परमां शरीरे च महत् सुखम्॥ २४॥
मध्ये तु तस्याः प्रासादं निर्मितं तपसात्रिणा। रुक्मसेतुप्रवेशान्तं सर्वरत्नमयं शुभम्॥ २५॥
शशाङ्करश्मेः संकाशं प्रासादं राजतं हितम्। रम्यवैदूर्यसोपानं विद्रुमामलसारकम्॥ २६॥
इन्द्रनीलमहास्तम्भं मरकतासक्तवेदिकम्। वज्रांशुजालैः स्फुरितं रम्यं दृष्टिमनोरमम्॥ २७॥
प्रासादे तत्र भगवान् देवदेवो जनार्दनः। भोगिभोगावलीसुप्तः सर्वालंकारभूषितः॥ २८॥
जान्वाच्य कुञ्चितस्त्वेको देवदेवस्य चक्रिणः। फणीन्द्रसंनिविष्टोऽङ्घ्रिर्द्वितीयश्च तथानघ॥ २९॥
लक्ष्म्युत्सङ्गतोऽङ्घ्रिस्तु शेषभोगप्रशायिनः। फणीन्द्रभोगसंन्यस्तबाहुः केयूरभूषणः॥ ३०॥

राजन्! उस शिलातलपर एक रमणीय पुष्करिणी (पोखरी) थी, जो चौकोर, मनोमोहिनी तथा आकाशके समान निर्मल थी। वह अत्यन्त शीतल एवं निर्मल जलसे परिपूर्ण तथा कमलोंसे सुशोभित थी। उसका वह जल सुस्वादु, पचनेमें हल्का, शीतल और सुगन्धयुक्त था। वह जैसे गलेको कष्ट नहीं पहुँचाता था, उसी प्रकार कुक्षिको भी वायुसे परिपूर्ण नहीं करता था अर्थात् वायुविकार नहीं उत्पन्न करता था, अपितु शरीरमें पहुँचकर परम तृप्ति उत्पन्न करता तथा महान् सुख पहुँचाता था। उस पुष्करिणी (बावली)के मध्य-भागमें महर्षि अत्रिने अपनी तपस्याके बलसे एक महलका निर्माण किया था। वह सुन्दर प्रासाद चाँदीका बना हुआ था, जो चन्द्रमाकी किरणोंके समान चमक रहा था। उसमें सभी प्रकारके रत्न जड़े गये थे तथा भीतर प्रवेश करनेके लिये सोनेकी सीढ़ियाँ बनी थीं, जिनमें रमणीय वैदूर्य एवं निर्मल मूँगे लगे हुए थे। उसमें इन्द्रनील मणिके विशाल खम्भे लगे थे। उसकी वेदिका अर्थात् फर्शपर मरकतमणि जड़ी हुई थी। हीरेकी किरणोंसे चमचमाता हुआ वह रमणीय महल देखते ही मनको लुभा लेता था। उस महलमें देवाधिदेव भगवान् जनार्दन (मूर्ति-रूपसे) सम्पूर्ण आभूषणोंसे विभूषित होकर शेषनागके फणोंपर शयन कर रहे थे। अनघ! देवाधिदेव चक्रधारी भगवान्‌का एक चरण घुटनेसे मुड़ा हुआ था और दूसरा चरण शेषनागके ऊपरसे होता हुआ लक्ष्मीकी गोदमें स्थित था। शेषनागके फणोंपर शयन करनेवाले भगवान्‌का बाजूबंदसे विभूषित एक हाथ शेषनागके फणोंपर स्थापित था॥ २२—३०॥

अङ्गुलीपृष्ठविन्यस्तदेवशीर्षधरं भुजम्। एकं वै देवदेवस्य द्वितीयं तु प्रसारितम्॥ ३१॥
समाकुञ्चितजानुस्थमणिबन्धेन शोभितम्। किंचिदाकुञ्चितं चैव नाभिदेशकरस्थितम्॥ ३२॥
तृतीयं तु भुजं तस्य चतुर्थं तु तथा शृणु। आत्तसंतानकुसुमं घ्राणदेशानुसर्पिणम्॥ ३३॥
लक्ष्म्या संवाह्यमानाङ्घ्रिः पद्मपत्रनिभैः करैः। संतानमालामुकुटं हारकेयूरभूषितम्॥ ३४॥
भूषितं च तथा देवमङ्गदैरङ्गुलीयकैः। फणीन्द्रफणविन्यस्तचारुरत्नशिखोज्ज्वलम्॥ ३५॥
अज्ञातवस्तुचरितं प्रतिष्ठितमथात्रिणा। सिद्धानुपूज्यं सततं संतानकुसुमार्चितम्॥ ३६॥
दिव्यगन्धानुलिप्ताङ्गं दिव्यधूपेन धूपितम्। सुरसैः सुफलैर्हृद्यैः सिद्धैरुपहृतैः सदा॥ ३७॥
शोभितोत्तमपार्श्वं तं देवमुत्पलशीर्षकम्।

उस हाथकी अङ्गुलियोंका पृष्ठभाग शेषके सिरपर रखा हुआ था। उनका दूसरा हाथ फैला हुआ था। तीसरे हाथका मणिबन्ध मुड़े हुए घुटनेपर सुशोभित था तथा कुछ मुड़कर नाभिदेशपर फैले हुए पहले हाथपर अवलम्बित था। अब उनके चौथे हाथकी दशा सुनो। चौथे हाथमें भगवान् कल्पवृक्षका पुष्प धारण किये हुए थे और उसे अपनी नासिकातक ले गये थे। उस समय लक्ष्मी अपने कमल-दलके समान कोमल हाथोंसे भगवान्‌का चरण दबा रही थीं। भगवान्‌के मस्तकपर कल्पवृक्षके पुष्पोंकी मालाओंका मुकुट शोभा दे रहा था। वे हार, केयूर, बाजूबंद और अँगूठीसे विभूषित तथा शेषनागके फणोंपर रखे हुए सुन्दर रत्नोंसे प्रकाशित हो रहे थे। इन्हीं

एक सौ बीसवाँ* अध्याय

राजा पुरूरवाकी तपस्या, गन्धर्वों और अप्सराओंकी क्रीडा, महर्षि अत्रिका आगमन तथा राजाको वर-प्राप्ति

सूत उवाच

स त्वाश्रमपदे रम्ये त्यक्ताहारपरिच्छदः। क्रीडाविहारं गन्धर्वैः पश्यत्यप्सरसां सह ॥ १ ॥
कृत्वा पुष्पोच्चयं भूरि ग्रथयित्वा तथा स्रजः। अर्घ्यं निवेद्य देवाय गन्धर्वेभ्यस्तदा ददौ ॥ २ ॥
पुष्पोच्चयप्रसक्तानां क्रीडन्तीनां यथासुखम्। चेष्टा नानाविधाकाराः पश्यन्नपि न पश्यति ॥ ३ ॥
काचित् पुष्पोच्चये सक्ता लताजालेन वेष्टिता। सखीजनेन संत्यक्ता कान्तेनाभिसमुज्झिता ॥ ४ ॥
काचित् कमलगन्धाभा निःश्वासपवनाहृतैः। मधुपैराकुलमुखी कान्तेन परिमोचिता ॥ ५ ॥
मकरन्दसमाक्रान्तनयना काचिदङ्गना। कान्तनिःश्वासवातेन नीरजस्ककृतेक्षणा ॥ ६ ॥
काचिदुच्चीय पुष्पाणि ददौ कान्तस्य भामिनी। कान्तसंग्रथितैः पुष्पै रराज कृतशेखरा ॥ ७ ॥
उच्चीय स्वयमुद्ग्रथ्य कान्तेन कृतशेखरा। कृतकृत्यमिवात्मानं मेने मन्मथवर्धिनी ॥ ८ ॥*

सूतजी कहते हैं—ऋषियो! इस प्रकार राजकीय सामग्रियों तथा आहारका परित्याग कर राजा पुरूरवा उस रमणीय आश्रममें निवास करने लगे। वहाँ उन्हें गन्धर्वोंके साथ अप्सराओंका क्रीडाविहार भी देखनेको मिलता था। राजा बहुत-से फूलोंको तोड़कर उसकी [माला] गूँथते थे और उन्हें अर्घ्यसहित पहले भगवान् [शंकर]को निवेदित कर पुनः गन्धर्वोंको दे देते थे। वे [राजा] पुष्प-चयनमें लगी हुई एवं सुखपूर्वक क्रीडा करती [हुई] अप्सराओंकी विभिन्न प्रकारकी चेष्टाओंको देखकर [भी] अनदेखी कर जाते थे। वहाँ पुष्प-चयनमें निरत कोई अप्सरा लता-समूहमें उलझ गयी और सखियाँ उसे उसी दशामें छोड़कर चलती बनीं, तब उसके पतिने आकर उसे बन्धन-मुक्त किया। किसी अप्सराके शरीरसे कमलकी-सी गन्ध निकल रही थी। इस कारण उसकी निःश्वासवायुसे आकृष्ट होकर भ्रमर उसके ऊपर मँडरा रहे थे। उन भ्रमरोंसे उसका मुख ढक-सा गया था; तब उसके पतिने उसे उस कष्टसे मुक्त किया। किसी अप्सराकी आँखें पुष्प-रजसे आक्रान्त हो गयीं, तब उसके पतिने अपनी श्वासवायुसे फूँककर उन्हें धूलरहित कर दिया। किसी सुन्दरीने पुष्पोंको एकत्रकर अपने पतिको दे दिया। तत्पश्चात् वह अपने पतिद्वारा गूँथी गयी पुष्प-मालाको अपने मस्तकपर रखकर सुशोभित होने लगी। तभी किसीके पतिने पुष्प-चयन करके अपने ही हाथों माला गूँथकर उसे अपनी पत्नीके मस्तकपर रखकर उसे सुसज्जित कर दिया, इससे उसने अपनेको कृतकृत्य मान लिया ॥ १—८ ॥

अस्त्यस्मिन् गहने कुञ्जे विशिष्टकुसुमा लता। काचिदेवं रहो नीता रमणेन रिरंसुना ॥ ९ ॥
कान्तसंनामितलता कुसुमानि विचिन्वती। सर्वाभ्यः काचिदात्मानं मेने सर्वगुणाधिकम् ॥ १० ॥
काश्चित् पश्यन्ति भूपालं नलिनीषु पृथक् पृथक्। क्रीडमानास्तु गन्धर्वैर्दिवरामा मनोरमाः ॥ ११ ॥
काचिदाताडयत् कान्तमुदकेन शुचिस्मिता। ताड्यमानाथ कान्तेन प्रीतिं काचिदुपाययौ ॥ १२ ॥
कान्तं च ताडयामास जातखेदा वराङ्गना। अदृश्यत वरारोहा श्वासनृत्यत्पयोधरा ॥ १३ ॥

* इस अध्यायके अनेक शब्दार्थालंकारोंसे उद्दीपित अधिकांश श्लोक भागवत १० । ३३ से मिलते हैं। कोई एक दूसरेसे अवश्य प्रभावित है। वैसे इस प्रकारका वर्णन गर्गसंहिता, ब्रह्मवैवर्तपुराणके रासप्रकरणोंमें तथा भागवतके रामनारायण-कृत भावविभाविक तथा किशोरीदासकृता विशुद्धरसदीपिकामें इनकी भी पूरी व्याख्या है।

राजन् ! वे अप्सराएँ सदा प्रदोषकालमें देवाधिदेव भगवान् जनार्दनके समक्ष नाना प्रकारके बाजोंके साथ नृत्य करती थीं। एक पहर रात बीत जानेपर वे गुफाके मुखद्वारसे बाहर निकलकर अपने पतियोंके साथ ऐसी सजी-सजायी गुफामें निवास करती थीं, जिसपर अनेकों प्रकारके गन्धोंवाली लताएँ फैली हुई थीं, जिसमेंसे विभिन्न प्रकारकी सुगन्ध निकल रही थी, जो पुष्प-समूहसे सुशोभित थी तथा जिसमें अनेकों विचित्र शय्याएँ बिछी थीं। महाराज ! इस प्रकार उस पर्वतपर अप्सराओंकी क्रीडाका अवलोकन करते हुए राजा पुरूरवा भगवान् केशवमें मनको एकाग्र करके तपस्या करते रहे। एक दिन यूथ-के-यूथ गन्धर्व और अप्सराएँ राजाके निकट जाकर उनसे बोलीं—'शत्रुओंका दमन करनेवाले नरेश ! (बड़े सौभाग्यसे) आप इस स्वर्ग-तुल्य देशमें आ गये हैं, अतः हमलोग आपको मनोऽभिलषित वर प्रदान करेंगी। उन्हें ग्रहणकर यदि आपकी इच्छा हो तो घर चले जाइये अथवा यहीं रहिये' ॥ २३—३७ ॥

राजोवाच

अमोघदर्शनाः सर्वे भवन्तस्त्वमितौजसः। वरं वितरताद्यैव प्रसादं मधुसूदनात् ॥ ३८ ॥
एवमस्त्वित्यथोक्तस्तैः स तु राजा पुरूरवाः। तत्रोवास सुखी मासं पूजयानो जनार्दनम् ॥ ३९ ॥
प्रिय एव सदैवासीद् गन्धर्वाप्सरसां नृपः। तुतोष स जनो राज्ञस्तस्यालौल्येन कर्मणा ॥ ४० ॥
मासस्य मध्ये स नृपः प्रविष्टस्तदाश्रमं रत्नसहस्रचित्रम्।
तोयाशनस्तत्र ह्युवास मासं यावत्सितान्तो नृप फाल्गुनस्य ॥ ४१ ॥
फाल्गुनामलपक्षान्ते राजा स्वप्ने पुरूरवाः। तस्यैव देवदेवस्य श्रुतवान् गदितं शुभम् ॥ ४२ ॥
रात्र्यामस्यां व्यतीतायामत्रिणा त्वं समेष्यसि। तेन राजन् समागम्य कृतकृत्यो भविष्यसि ॥ ४३ ॥
स्वप्नमेवं स राजर्षिर्दृष्ट्वा देवेन्द्रविक्रमः। प्रत्यूषकाले विधिवत् स्नातः स प्रयतेन्द्रियः ॥ ४४ ॥
कृतकृत्यो यथाकामं पूजयित्वा जनार्दनम्। ददर्शात्रिं मुनिं राजा प्रत्यक्षं तपसां निधिम् ॥ ४५ ॥
स्वप्नं तु देवदेवस्य न्यवेदयत धार्मिकः। ततः शुश्राव वचनं देवतानां समीरितम् ॥ ४६ ॥
एवमेतन्महीपाल नात्र कार्या विचारणा। एवं प्रसादं सम्प्राप्य देवदेवाज्जनार्दनात् ॥ ४७ ॥
कृतदेवार्चनो राजा तथा हुतहुताशनः। सर्वान् कामानवाप्तोऽसौ वरदानेन केशवात् ॥ ४८ ॥

इति श्रीमात्स्ये महापुराणे भुवनकोशे ऐलाश्रमवर्णनं नाम विंशत्यधिकशततमोऽध्यायः ॥ १२० ॥

राजाने कहा—गन्धर्वो एवं अप्सराओ ! आपलोग अमित तेजस्वी हैं, इससे आपलोगोंका दर्शन कभी निष्फल नहीं होता, इसलिये आपलोग आज ही मुझे ऐसा वरदान दें, जिससे भगवान् मधुसूदनकी कृपा प्राप्त हो जाय। यह सुनकर वे 'एवमस्तु—ऐसा ही होगा'—ऐसा कहकर वहाँसे चले गये। तत्पश्चात् राजा पुरूरवा वहाँ एक मासतक भगवान् जनार्दनकी पूजा करते हुए सुखपूर्वक निवास करते रहे। वे सदा गन्धर्वों एवं अप्सराओंके प्रेमपात्र बने रहे। वे लोग राजाके निर्लोभ कर्मसे परम संतुष्ट थे। राजन् ! उस मासके बीचमें ही राजा पुरूरवाने हजारों रत्नोंसे चित्रित उस आश्रममें प्रवेश किया। वहाँ वे एक मासतक केवल जल पीकर तबतक निवास करते रहे, जबतक फाल्गुनमासके शुक्लपक्षकी पूर्णिमा तिथि नहीं आ गयी। राजा पुरूरवाने फाल्गुनमासके शुक्लपक्षकी पूर्णिमा तिथिकी रातमें स्वप्नमें उन्हीं देवाधिदेव भगवान् विष्णुद्वारा कहे जाते हुए इस प्रकारके मङ्गलमय शब्दोंको सुना—'राजन् ! इस रात्रिके व्यतीत हो जानेपर अत्रिसे तुम्हारी भेंट होगी और उनसे मिलकर तुम कृतकृत्य हो जाओगे।

कोंसे घिरे हुए अपने अनुयायियोंके साथ निवास ते हैं। पुण्यमयी मन्दाकिनी तथा कल्याणकारिणी अच्छोदा—ये दोनों नदियाँ पृथ्वी-मण्डलके मध्यभागसे प्रवाहित होती हुई महासागरमें मिली हैं ॥ १—९½ ॥

कैलासदक्षिणे प्राच्यां शिवं सर्वौषधिं गिरिम् ॥ १० ॥
मनःशिलामयं दिव्यं सुवेलं पर्वतं प्रति। लोहितो हेमशृङ्गस्तु गिरिः सूर्यप्रभो महान् ॥ ११ ॥
तस्य पादे महद् दिव्यं लोहितं सुमहत्सरः। तस्मात् प्रभवते पुण्यो लौहित्यश्च नदो महान् ॥ १२ ॥
दिव्यारण्यं विशोकं च तस्य तीरे महद् वनम्। तस्मिन् गिरौ निवसति यक्षो मणिधरो वशी ॥ १३ ॥
सौम्यैः सुधार्मिकैश्चैव गुह्यकैः परिवारितः। कैलासात् पश्चिमोदीच्यां ककुद्मानौषधीगिरिः ॥ १४ ॥
ककुद्मति च रुद्रस्य उत्पत्तिश्च ककुद्मिनः। तदञ्जनं त्रैककुदं शैलं त्रिककुदं प्रति ॥ १५ ॥
सर्वधातुमयस्तत्र सुमहान् वैद्युतो गिरिः। तस्य पादे महद् दिव्यं मानसं सिद्धसेवितम् ॥ १६ ॥
तस्मात् प्रभवते पुण्या सरयूर्लोकपावनी। यस्यास्तीरे वनं दिव्यं वैभ्राजं नाम विश्रुतम् ॥ १७ ॥
कुबेरानुचरस्तस्मिन् प्रहेतितनयो वशी। ब्रह्मधाता निवसति राक्षसोऽनन्तविक्रमः ॥ १८ ॥

कैलासके दक्षिण-पूर्व दिशामें लाल वर्णवाला हेमशृङ्ग क एक विशाल पर्वत है। वह दिव्य सुवेल पर्वततक हुआ है। उसकी कान्ति सूर्यके समान है। वह श्प्रद पर्वत सभी प्रकारकी ओषधियोंसे सम्पन्न तथा ल नामक धातुसे परिपूर्ण है। उसके पाद-प्रान्तमें विशाल दिव्य सरोवर है, जिसका नाम लोहित है। पुण्यमय लौहित्य (ब्रह्मपुत्र) नामक महान् नदका :स्य है। उस नदके तटपर विशोक नामक एक एवं विस्तृत वन है। उस पर्वतपर मणिधर नामक यक्ष वशमें करके परम धार्मिक एवं सौम्य-स्वभाव- गुह्यकोंके साथ निवास करता है। कैलासकी ोत्त दिशामें ककुद्मान् नामक पर्वत है, जिसपर सभी प्रकारकी ओषधियाँ सुलभ हैं। वह अञ्जन-जैसा काला तथा तीन शिखरोंसे सुशोभित है। उस ककुद्मान् पर्वतपर भगवान् रुद्रके गण ककुद्मी (नन्दिकेश्वर)की उत्पत्ति हुई है। वहीं समस्त धातुओंसे सम्पन्न वैद्युत नामक अत्यन्त महान् पर्वत है, जो त्रिककुद् पर्वततक विस्तृत है। उसके पाद-प्रान्तमें सिद्धोंद्वारा सेवित एक महान् दिव्य मानस सरोवर है। उस सरोवरसे लोकपावनी पुण्य-सलिला सरयू* निकली हुई हैं, जिनके तटपर (वरुणका) वैभ्राज नामक सुप्रसिद्ध दिव्य वन है। उस वनमें प्रहेतिका पुत्र ब्रह्मधाता नामक राक्षस निवास करता है। वह जितेन्द्रिय, अनन्तपराक्रमी और कुबेरका अनुचर है ॥ १०—१८ ॥

कैलासात् पश्चिमामाशां दिव्यः सर्वौषधिर्गिरिः। वरुणः पर्वतश्रेष्ठो रुक्मधातुविभूषितः ॥ १९ ॥
भवस्य दयितः श्रीमान् पर्वतो हैमसंनिभः। शातकौम्भमयैर्दिव्यैः शिलाजालैः समाचितः ॥ २० ॥
शतसंख्यैस्तापनीयैः शृङ्गैर्दिवमिवोल्लिखन्। शृङ्गवान् सुमहादिव्यो दुर्गः शैलो महाचितः ॥ २१ ॥
तस्मिन् गिरौ निवसति गिरिशो धूम्रलोचनः। तस्य पादात् प्रभवति शैलोदं नाम तत्सरः ॥ २२ ॥
तस्मात् प्रभवते पुण्या नदी शैलोदका शुभा। सा चक्षुषी तयोर्मध्ये प्रविष्टा पश्चिमोदधिम् ॥ २३ ॥
अस्त्युत्तरेण कैलासाच्छिवः सर्वौषधो गिरिः। गौरं तु पर्वतश्रेष्ठं हरितालमयं प्रति ॥ २४ ॥
हिरण्यशृङ्गः सुमहान् दिव्यौषधिमयो गिरिः। तस्य पादे महद् दिव्यं सरः काञ्चनवालुकम् ॥ २५ ॥
रम्यं बिन्दुसरो नाम यत्र राजा भगीरथः। गङ्गार्थं स तु राजर्षिरुवास बहुलाः समाः ॥ २६ ॥
दिवं यास्यन्तु मे पूर्वे गङ्गातोयाप्लुतास्थिकाः। तत्र त्रिपथगा देवी प्रथमं तु प्रतिष्ठिता ॥ २७ ॥

* इस अध्यायका हिमालयसे सम्बद्ध भौगोलिक विवरण बड़े महत्त्वका है और यह वर्णन बहुत कुछ कालिदा- ासे मिलता है।

जाऊँगी। जब शंकरजीको गङ्गाकी यह कुचेष्टा और क्रूर अभिप्राय ज्ञात हुआ, तब वे उसे गङ्गाका अभिमान समझकर क्रुद्ध हो गये और उस नदी-रूपिणी गङ्गाको अपने अङ्गोंमें ही लीन कर लेनेका विचार करने लगे; परंतु ठीक इसी समय राजा भगीरथ, जिनकी इन्द्रियाँ भूखसे व्याकुल हो गयी थीं तथा जिनके शरीरमें नसेंमात्र दीख रही थीं, शिवजीके सम्मुख आ गये। उन क्षीण-काय नरेशको देखकर शंकरजी विचारमें पड़ गये कि इसने तो पहले ही इस नदीको भूतलपर ला[ने] तपस्याद्वारा मुझे संतुष्ट कर लिया है। फिर [इ] राजाको दिये गये वरदानको यादकर उन्होंने अप[ने] रोक लिया। तत्पश्चात् गङ्गा नदीको धारण क[र] ब्रह्माद्वारा कहे गये वचनोंको सुनकर तथा भगीर[थ] तपस्यासे प्रसन्न हो भगवान् शंकरने अपने तेज हुई गङ्गा-नदीको छोड़ दिया। इसके बाद ग[ङ्गा] धाराओंमें विभक्त होकर प्रवाहित हुईं ॥ ३०-३

त्रीणि प्राचीमभिमुखं प्रतीचीं त्रीण्यथैव तु। स्रोतांसि त्रिपथायास्तु प्रत्यपद्यन्त सप्तधा॥
नलिनी ह्लादिनी चैव पावनी चैव प्राच्यगाः। सीता चक्षुश्च सिन्धुश्च तिस्रस्ता वै प्रतीच्यगाः।
सप्तमी त्वनुगा तासां दक्षिणेन भगीरथम्। तस्माद् भागीरथी सा वै प्रविष्टा दक्षिणोदधिम्।
सप्त चैताः प्लावयन्ति वर्षं तु हिमसाह्वयम्। प्रसूताः सप्त नद्यस्तु शुभा बिन्दुसरोद्भवाः॥
तान् देशान् प्लावयन्ति स्म म्लेच्छप्रायांश्च सर्वशः। सशैलान् कुकुरान् रौध्रान् बर्बरान् यवनान् खसान्
पुलिन्दांश्च कुलत्थांश्च अङ्गलोक्यान् वरांश्च यान्। कृत्वा द्विधा हिमवन्तं प्रविष्टा दक्षिणोदधिम्॥
अथ वीरमरूंश्चैव कालिकांश्चैव शूलिकान्। तुषारान् बर्बरान् कारान् पह्लवान् पारदाञ्छकान्॥
एताञ्जनपदांश्चक्षुः प्लावयित्वोदधिं गता। दरदोर्जगुडांश्चैव गान्धारानौरसान् कुहून्॥
शिवपौरानिन्द्रमरून् वसतीन् समतेजसम्। सैन्धवानुर्वशान् वर्वान् कुपथान् भीमरोमकान्॥
शुनामुखांश्चोर्दमरून् सिन्धुरेतान् निषेवते। गन्धर्वान् किंनरान् यक्षान् रक्षोविद्याधरोरगान्॥
कलापग्रामकांश्चैव तथा किम्पुरुषान् नरान्। किरातांश्च पुलिन्दांश्च कुरून् वै भारतानपि॥
पाञ्चालान् कौशिकान् मत्स्यान् मागधाङ्गांस्तथैव च। सुह्मोत्तरांश्च वङ्गांश्च ताम्रलिप्तांस्तथैव च॥
एताञ्जनपदानार्यान् गङ्गा भावयते शुभा। ततः प्रतिहता विन्ध्ये प्रविष्टा दक्षिणोदधिम्॥

उद्भिदान्युदकान्यत्र प्रवहन्ति सरिद्वराः।

वंशौकसाराके तटपर सुरभि नामक वह वन है, तमें जितेन्द्रिय एवं विद्वान् हिरण्यश्रृङ्ग निवास ता है। वह कुबेरका अनुचर, यज्ञसे विमुख, अमित स्वी एवं परम पराक्रमी है। वहीं अगस्त्यगोत्रीय न् ब्रह्मराक्षसोंका भी निवासस्थान है। (उनकी ा चार है।) वे चारों कुबेरके अनुचर हैं, जो हिरण्यश्रृङ्गके आश्रममें रहते हैं। इसी प्रकार निवासियोंकी सिद्धि समझनी चाहिये। वह धर्म, और अर्थके अनुसार परस्पर दुगुना फल देनेवाली है। हेमकूट पर्वतके पृष्ठभागपर जो सर्पोंका र बतलाया जाता है, उसीसे सरस्वती और ज्योतिष्मती नामकी दो नदियाँ निकली हैं। वे ः पूर्व और पश्चिम समुद्रमें जाकर मिली हैं। श्रेष्ठ निषधपर विष्णुपद नामक सरोवर है, जो उसी के अग्रभागसे निकला हुआ है। वे दोनों (नाग विष्णुपद) सरोवर गन्धर्वोंके अनुकूल हैं। मेरुके पार्श्वभागसे चन्द्रप्रभ नामक महान् सरोवर तथा पुण्यसलिला जम्बूनदी निकलती है। जम्बूनदीमें जाम्बूनद नामक सुवर्ण पाया जाता है। वहीं पयोद और पुण्डरीकवान् नामक दो सरोवर और हैं, जिनका जल क्रमशः नील और श्वेत है। इन पुण्डरीक और पयोद सरोवरोंसे दो सरोवर और प्रकट हुए हैं। उनमें एक सरोवरसे निकला हुआ सर उत्तरमानस नामसे प्रसिद्ध है। उससे मृग्या और मृगकान्ता नामकी दो नदियाँ निकली हैं। कुरुदेशमें सागरके समान अगाध एवं विस्तृत बारह ह्रद हैं, जो कमलों और मछलियोंसे भरे रहते हैं, वे 'वैजय' नामसे विख्यात हैं। उनसे शान्ती और मध्वी नामकी दो नदियाँ निकली हैं। किम्पुरुष आदि जो आठ वर्ष हैं, उनमें इन्द्रदेव वर्षा नहीं करते, अपितु वहाँकी बड़ी-बड़ी नदियाँ ही अन्नोत्पादक जलको प्रवाहित करती हैं॥ ६१—७१½॥

बलाहकश्च ऋषभो चक्रो मैनाक एव च॥ ७२॥

विनिविष्टाः प्रतिदिशं निमग्ना लवणाम्बुधिम्। चन्द्रकान्तस्तथा द्रोणः सुमहांश्च शिलोच्चयः॥ ७३॥
उदगायता उदीच्यां तु अवगाढा महोदधिम्। चक्रो बधिरकश्चैव तथा नारदपर्वतः॥ ७४॥
प्रतीचीमायतास्ते वै प्रतिष्ठास्ते महोदधिम्। जीमूतो द्रावणश्चैव मैनाकश्चन्द्रपर्वतः॥ ७५॥
आयतास्ते महाशैलाः समुद्रं दक्षिणं प्रति। चक्रमैनाकयोर्मध्ये दिवि संदक्षिणापथे॥ ७६॥
तत्र संवर्तको नाम सोऽग्निः पिबति तज्जलम्। अग्निः समुद्रवासस्तु और्वोऽसौ वडवामुखः*॥ ७७॥
इत्येते पर्वताविष्टाश्चत्वारो लवणोदधिम्। छिद्यमानेषु पक्षेषु पुरा इन्द्रस्य वै भयात्॥ ७८॥
तेषां तु दृश्यते चन्द्रे शुक्ले कृष्णे समाप्लुतिः। ते भारतस्य वर्षस्य भेदा येन प्रकीर्तिताः॥ ७९॥
इहोदितस्य दृश्यन्ते अन्ये त्वन्यत्र चोदिताः। उत्तरोत्तरमेतेषां वर्षमुद्रिच्यते गुणैः॥ ८०॥
आरोग्यायुःप्रमाणाभ्यां धर्मतः कामतोऽर्थतः। समन्वितानि भूतानि तेषु वर्षेषु भागशः॥ ८१॥
वसन्ति नानाजातीनि तेषु सर्वेषु तानि वै। इत्येतद् धारयद् विश्वं पृथ्वी जगदिदं स्थिता॥ ८२॥

इति श्रीमात्स्ये महापुराणे भुवनकोशे जम्बूद्वीपवर्णनं नामैकविंशत्यधिकशततमोऽध्यायः॥ १२१॥

बलाहक, ऋषभ, चक्र और मैनाक—ये चारों पर्वत ः चारों दिशाओंमें लवणसागरतक फैले हुए हैं। कान्त, द्रोण तथा सुमहान्—इन पर्वतोंका विस्तार उत्तर दिशामें महासागरतक है। चक्र, बधिरक और नारद—ये पर्वत पश्चिम दिशामें फैले हुए हैं। इनका विस्तार महासागरतक है। जीमूत, द्रावण, मैनाक और चन्द्र—

* आर्यभट्टीय आदिके अनुसार वडवामुख दक्षिणीध्रुवके पास एक स्थान है, जिस मार्गसे लोग पातालमें प्रवेश ये। बडवाग्निको वडवाचक्र, वडवाभुग; हुत् आदि भी कहा गया है। महावीरचरितमें इसके रूप आदिका भी वर्णन है।

दिशाओंमें सीधे फैले हुए हैं। ये ही वहाँ वर्षपर्वत कहलाते हैं। ये रत्नाकराद्रि नामवाले वर्षपर्वत ऊँचे शिखरोंसे युक्त तथा वृक्षोंसे सम्पन्न हैं। ये द्वीप विस्तारके परिमाणकी समानतामें चारों दिशाओंमें फैले हुए हैं और एक ओर क्षीरसागरतक तथा दूसरी ओर लवणसागरतक पहुँच गये हैं। अब मैं शाकद्वीपके सातों दिव्य महापर्वतोंका वर्णन कर रहा हूँ। उनमें पहला पर्वत मेरु कहा जाता है, जो देवों, ऋषियों और गन्धर्वोंसे सुसेवित है। वह स्वर्णमय पर्वत पूर्व दिशामें फैला हुआ है। उसक दूसरा नाम 'उदयगिरि' है। वहाँ मेघगण वृष्टि करनेके लि आते हैं और (जल बरसाकर) चले जाते हैं। उसं पार्श्वभागमें सम्पूर्ण ओषधियोंसे सम्पन्न जलधार नामक अत्यन्त विशाल पर्वत है। वह चन्द्र नामसे भी विख्या है। उसी पर्वतसे इन्द्र नित्य अधिक-से-अधिक ज ग्रहण करते हैं ॥ १—१० ॥

नारदो नाम चैवोक्तो दुर्गशैलो महाचितः। तत्राचलौ समुत्पन्नौ पूर्वं नारदपर्वतौ ॥ ११ ॥
तस्यापरेण सुमहाञ् श्यामो नाम महागिरिः। यत्र श्यामत्वमापन्नाः प्रजाः पूर्वमिमाः किल ॥ १२ ॥
स एव दुन्दुभिर्नाम श्यामपर्वतसंनिभः। शब्दमृत्युः पुरा तस्मिन् दुन्दुभिस्ताडितः सुरैः ॥ १३ ॥
रत्नमालान्तरमयः शाल्मलश्चान्तरालकृत्। तस्यापरेण रजतो महानस्तो गिरिः स्मृतः ॥ १४ ॥
स वै सोमक इत्युक्तो देवैर्यत्रामृतं पुरा। सम्भृतं च हृतं चैव मातुरर्थे गरुत्मता ॥ १५ ॥
तस्यापरे चाम्बिकेयः सुमनाश्चैव स स्मृतः। हिरण्याक्षो वराहेण तस्मिञ्शैले निषूदितः ॥ १६ ॥
आम्बिकेयात् परो रम्यः सर्वौषधिनिषेवितः। विभ्राजस्तु समाख्यातः स्फाटिकस्तु महान् गिरिः ॥ १७ ॥
यस्माद् विभ्राजते वह्निर्विभ्राजस्तेन स स्मृतः। सैवेह केशवेत्युक्तो यतो वायुः प्रवाति च ॥ १८ ॥

